गातुः, पुं, (गायतीति । गै गाने + “कमिमनिजनिगाभायाहिभ्यश्च ।” उणां । १ । ७३ । इति तुः ।) कोकिलः । भ्रमरः । गन्धर्व्वः । इति मेदिनी । ते । १५ ॥ (गाते गच्छतीति । गा ङ गतौ + कमिमनीतिसूत्रे गानिर्द्देशात् तुः । पथिकः । इति उज्ज्वलदत्तः ॥ गै गाने + भावे तु । गानम् । यथा, ऋग्वेदे । ४ । ५१ । १ । “गातुं कृण्वन्नुषसो जनाय ।” “गातुं गानम् ।” इति भाष्यम् ॥ गाते गच्छत्यत्र इति । गा ङ गतौ + अधिकरणे तु । गमनीयः पन्थाः । यथा, ऋग्वेदे । ६ । ८५ । ४ । “उरुं नो गातुं कृणु सोममीढ्वः ।” “गातुं गन्तव्यमार्गम् ।” इति भाष्यम् ॥ पृथिवी । यथा, तत्रैव । ३ । ३१ । १५ । “इन्द्रो नृभिरजनद्दीद्यानः साकं सूर्य्यमुषसं गातुमग्निम् ।” “गातुं पृथिवीम् ।” इति भाष्यम् ॥ गा र लि स्तुतौ + भावे तुः । स्तवः । यथा, तत्रैव । ४ । ४ । ६ । “स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।” “गातुं स्तवम् ।” इति भाष्यम् ॥ उपायः । यथा, तत्रैव । ५ । ६५ । ४ । “मित्रो अंहोश्चिदादुरुक्षयाय गातुं वनते ।” “गातुमुपायम् ।” इति भाष्यम् ॥)

गातुः, त्रि, (गाते कोपं गच्छतीति । गा ङ गतौ + “कमिमनीति ।” उणां । १ । ७३ । इति गानिर्द्देशात् तुः ।) रोषणः । इति मेदिनी । ते । १५ ॥ (गायतीति । गै गाने + तुः ।) गायनः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गात्र, त् क ङ शैथिल्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-आत्मं-अकं-सेट् ।) दन्त्यवर्गमध्यः । ङ, गात्रयते गात्रापयते । इति दुर्गादासः ॥

गात्रं, क्ली, (गच्छत्यनेन । गम् + “गमेरा च ।” उणां । ४ । १६८ । इति त्रन् आकारादेशश्च ।) हस्तिपूर्ब्बजङ्घादिदेशः । इत्यग्रपदादिसम्मुखभागः । (यथा, माघे । १८ । ४६ ।

“आपस्काराल्लूनगात्रस्य भूमिं
निःसाधारं गच्छतोऽवाङ्मुखस्य ॥”

“लूनगात्रस्य छिन्नजङ्घस्य ॥” इति तट्टीकायां मल्लिनाथः ॥ * ॥ गच्छति मरणात् परं स्वकारणभूतपञ्चत्वं प्राप्नोति यद्वा गम्यते स्थानात् स्थानान्तरं प्राप्यते सञ्चाल्यते वाऽनेन इति ।) अङ्गम् । इति मेदिनी । रे । २३ । हस्तपादाद्यवयवसमुदयः । गा इति भाषा ॥ (यथा, महाभारते । १ । १५४ । ३० ।

“अद्य गात्राणि ते कङ्काः श्येना गोमायवस्तथा ।
कर्षन्तु भुवि संहृष्टा विहतस्य मया मृधे ॥”)

तत्पर्य्यायः । कलेवरम् २ वपुः ३ संहननम् ४ शरीरम् ५ वर्ष्म ६ विग्रहः ७ कायः ८ देहः ९ मूर्त्तिः १० तनुः ११ तनूः १२ । इत्यमरः । २ । ६ । ७० ॥ इन्द्रियायतनम् १३ अङ्गम् १४ चेत्रम् १५ भूघनः १६ मत्करणम् १७ वेरम् १८ सञ्चरः १९ घनः २० बन्धः २१ परम् २२ पिण्डः २३ पुद्गलम् २४ । इति हेमचन्द्रः ॥ भूतात्मा २५ स्वर्गलोकेशः २६ स्कन्धः २७ पञ्जरः २८ कुलम् २९ बलम् ३० । इति जटाधरः ॥

(गात्रवादनादि निषेधो यथा,—

‘गात्रवक्त्रनखैर्वाद्यं हस्तकेशावधूननम् ।
तोयाग्निपूज्यमध्येन यानं धूमं शवाश्रयम् ॥
मद्यातिसक्तिं विश्रम्भस्वातन्त्र्ये स्त्रीषु च त्यजेत् ॥”

इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ॥)

गात्रभङ्गाः, स्त्री (गात्रस्य भङ्गोऽवसादो यस्याः ।) शूकशिम्बी । इति शब्दचन्द्रिका ॥

गात्रमार्ज्जनी, स्त्री, (गात्रं मृज्यतेऽनयेति । मृज् + ल्युट् + स्त्रियां ङीप् ।) शरीरमार्ज्जनार्थं वस्त्रम् । इति लोकप्रसिद्धिः ॥ गामोछा इति भाषा ॥

गात्रसङ्कोची, [न्] पुं, (गात्रं सङ्कोचयतीति । सम् + कुच् + णिच् + णिनिः । यद्वा, गात्रस्य सङ्कोची ।) जाहकजन्तुः । इति राजनिर्घण्टः ॥

गात्रसंप्लवः, पुं, (गात्रेण संप्लवते भासते सन्तरति जले इत्यर्थः । सम् + प्लु + अच् ।) प्लवपक्षी । इति हेमचन्द्रः । ४ । ४०६ ॥

गात्रसम्मितः, पुं. (गात्रं सम्मितं उत्पन्नावयवमात्रं यत्र ।) गात्रावयवोत्पत्तिः । यथा,—

“पाद उत्पन्नमात्रे तु द्वौ पादौ गात्रसम्मिते ।
पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनम् ॥
अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेतःसमन्विते ।
द्विगुणं गोव्रतं कुर्य्यात् प्रायश्चित्तं विशुद्धये ॥

मध्यमवचनं भवदेवेन व्याख्यातम् । यदा लगुडाद्यभिघातेन गौर्जीवति गर्भमात्रपातो भवति तदोत्पन्नगर्भमात्रपाते यथोक्तप्रायश्चित्तपादाचरणम् । गात्रावयवोत्पत्तौ प्रायश्चित्तपादद्वयम् । सकलगात्रसम्पत्तौ प्रायश्चित्तपादत्रयम् । अथ चैतन्ययुक्तगर्भघाते कृत्स्नमेव प्रायश्चित्तमहनीयम् ।” इति प्रायश्चित्ततत्त्वम् ॥

गात्रानुलेपनी, स्त्री, (गात्रमनुलिप्यतेऽनया इति । अनु + लिप् + ल्युट् + स्त्रियां ङीप् ।) गात्रानुलेपनयोग्यं घृष्टं पिष्टं वा सुगन्धिद्रव्यम् । तत्पर्य्यायः । वर्त्तिः २ वर्णकम् ३ विलेपनम् ४ । इत्यमरः । २ । ७ । १३३ ॥

गायकः, त्रि, (गायतीति । गै गाने + “गस्थकन् ।” ३ । १ । १४६ । इति थकन् ।) गायकः । इति त्रिकाण्डशेषः ॥

गाथा, स्त्री, (गीयते इति । गै गाने + “उषिकुषिगार्त्तिभ्यस्थन् ।” उणां । २ । ४ । इति थन् स्त्रियां टाप् ।) श्लोकः । (यथा, महाभारते । ३ । ८५ । ३० ।

“गाथा च गीतिका चापि तस्य सम्पद्यते नृप ! ॥”)

संस्कृतान्यभाषा । सा तु प्राकृतभाषा । गेयम् । तच्च गीतम् । (यथा, मनुः । ९ । ४२ ।

“अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥”)

वृत्तम् । तत्तु अक्षरसंख्यातं पद्यम् । इति मेदिनी । थे । ६ ॥

गाध, ऋ ङ प्रतिष्ठायाम् । ग्रन्थे । लिप्सायाम् इति कविकल्पद्रुमः । (भ्वां-आत्मं-प्रतिष्ठायां सकं-अन्यत्र अकं-सेट् ।) ऋ, अजगाधत् । ङ, गाधितासे नभो भूय इति भट्टिः । गाधते मालिकः स्रजः । इति दुर्गादासः ॥

गाधः, पुं, (गाध प्रतिष्ठायां लिप्सायाञ्च + भावे घञ् ।) स्थानम् । (यथा, महाभारते । १ । २१ । १३ ।

“अनासादितगाधञ्च पातालतलमव्ययम् ॥”)

लिप्सा । इति हेमचन्द्रः ॥ (कूलम् । परपारम् । यथा, महाभारते । ७ । ११३ । २ ।

“द्वीपो य आसीत् पाण्डूनामगाधे गाधमिच्छताम् ॥”

सुखोत्तरणीये, त्रि । यथा, रघुः । ४ । २४ ।

“सरितः कुर्व्वती गाधाः पथश्चाश्यानकर्द्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥”

स्त्रियां टाप् । गायत्रीरूपिणी महादेवी । यथा, देवीभागवते । १२ । ६ । ४० ।

“गौतमी गामिनी गाधा गन्धर्व्वाप्सरसेविता ॥”
“गाधा प्रतिष्ठारूपिणी ।” इति तट्टीका ॥)

गाधिः, पुं, (गाधते उच्चपदं लिप्सतीति । गाध ङ लिप्सायाम् + “सर्व्वधातुभ्य इन् ।” उणां । ४ । ११७ । इति इन् ।) चन्द्रवंशीयकुशिकराजपुत्रः । स तु विश्वामित्रमुनिपिता कान्यकुब्जदेशस्य राजा च । (यथा, महाभारते । ३ । ११५ । १९ ।

“कान्यकुब्जे महानासीत् पार्थिवः सुमहाबलः ।
गाधीति विश्रुतो लोके वनवासं जगाम ह ॥”

अस्य उत्पत्तिकथा यथा, हरिवंशे । २७ । १३—१६ ।

“कुशिकस्तु तपस्तेपे पुत्त्रमिन्द्रसमं विभुः ।
लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् ॥
पूर्णे वर्षसहस्रे वै तन्तु शक्रो ह्यपश्यत ।
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः ॥
समर्थं पुत्त्रजनने स्वमेवांशमवासयत् ।
पुत्त्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः ॥
स गाधिरभवद्राजा मघवान् कौशिकः स्वयम् ।
पौरकुत्स्यभवद्भार्य्या गाधिस्तस्यामजायत ॥”

अस्य कन्या सत्यवती भृगुवंशीय-ऋचीकपत्नी । सा च जमदग्निं प्रसूतवती । यथा, हरिवंशे । २७ । १८ ।

“गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा ।
तां गाधिः काव्यपुत्त्राय ऋचीकाय ददौ प्रभुः ॥”

ऋग्वेदमते तु अयमेव गाथीत्याख्यया प्रसिद्धः इति तु तत्रैव ३ मण्डले द्रष्टव्यः । एतदनुसारेणैव रामायणे ‘गाधिन् इति नामप्रयोगो भगवता वाल्मीकिना विहितः । यथा, तत्रैव १ । १८ । ४० ।

“शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः [सुतम् ॥”)

गाधिजः, पुं, (गाधेः राज्ञः कौशिकात् जायते इति । जन् + डः ।) विश्वामित्रमुनिः । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ७ । ४२ ।

“पृथुस्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च ।